# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** आचार्य-**1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 3 - CC - 4.1.2** | **समयः- 8 तः 11** |
| **दिनाङ्कः- 11/10/2019** | **सन्दर्भग्रन्थः –** भागवते पञ्चमः स्कन्धः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 एकस्य ससन्दर्भं व्याख्या कार्या। 05**

1. देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम्।
   भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहं द्विजदेवदेव ।।
2. न ब्राह्मणैस्तुलये भूतमन्यत् पश्यामि विप्राः किमतः परं नु।
   यस्मिन्नृभिः प्रहुतं श्रद्धयाऽहमश्नामि कामं न तथाऽग्निहोत्रे ।।

**प्र-2 एकस्य वर्णनं कुरुत। 10**

1. भरतचरितं यथाधीतं वर्णयत।
2. ऋषभदेवेन स्वपुत्रेभ्यः प्रदत्तोपदेशं वर्णयत।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 एकस्य ससन्दर्भं व्याख्या कार्या। 05**

1. नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात्।
   नाग्न्यर्कसोमानिलवित्तपास्त्राच्छेङ्के भृशं ब्रह्मकुलावमानात् ।।
2. अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन्।
   न यद् धृषीकेश यशः कृतात्मनां महात्मनां वः प्रचुरः समागमः ।।

**प्र-4 एकस्य सविस्तरमुत्तरं लिखत। 10**

1. राज्ञे रहुगणाय भरतन प्रदत्तोपदेशः।
2. भरतस्य ब्राह्मणकुले जन्म।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 एकस्य ससन्दर्भं व्याख्या कार्या। 05**

1. स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया।
   मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ।।
2. अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः।
   यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः ।।

**प्र-6 एकस्य समीक्षा कार्या।** **10**

1. भरतवंशवर्णनम्।
2. भारतवंशवर्णनम्।

**प्र-7 ससन्दर्भं विवेचनं विधीयताम्।** **05**

1. अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः।
   अन्तर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटम्॥
2. परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट्।
   देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यजेत्॥

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य सविस्तरमुत्तरं लिखत।** **10**

1. नरकाणां विभिन्नगतीनां वर्णनम्।
2. शिशुमारचक्रवर्णनम्।

**(पञ्चमान्वितिः - युनिट- 5 )**

**प्र-9 दशानां लघूत्तराणि लिखत।** **10**

1. पञ्चमस्कन्धे कति अध्यायाः
2. देवयानी कस्य पुत्र्यासीत्
3. आग्नीध्रपुत्रस्य नाम किम्
4. कस्य कामनया नाभिः यज्ञपुरुषमयजत ?
5. नायं देहो देहभाजामिति कः ब्रूते
6. महापुरुषाणां सेवा कस्य द्वारमस्ति
7. कामीजनसङ्गः कस्य द्वारं प्रोक्तम्
8. भरतः कं मन्त्रं जजाप
9. मृगशापकं दृष्ट्वा कस्यासक्तिः वृद्धिं गता
10. महानद्यां भरतः कियत्कालम् उपविवेश
11. कस्य वधः सर्वथा निषिद्धः
12. रहुगणः कस्य देशस्य राजासीत्
13. ब्राह्मणकुलावमानात् कः बिभेति
14. ज्ञानेन्द्रियाणि कति के च विषयाः
15. इलावृतदेशस्य दक्षिणे कति के च ते पर्वताः सन्ति

********************